


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
IJAAS 2019; 1(2): 153-155
Received: 15-08-2019
Accepted: 18-09-2019

**डॉ. गोविन्द नाथ चौधरी**
अतिथि प्राध्यापक, व्याकरणम्,
राजकीय संस्कृत महाविद्यालयः,
भागलपुरम्, का.सिं.द.सं.वि.वि.,
दरभंगा, बिहार, भारत।

**Corresponding Author:**
**डॉ. गोविन्द नाथ चौधरी**
अतिथि प्राध्यापक, व्याकरणम्,
राजकीय संस्कृत महाविद्यालयः,
भागलपुरम्, का.सिं.द.सं.वि.वि.,
दरभंगा, बिहार, भारत।

# 'वृद्धिरादैच्' इति सूत्रस्य स्वारस्यम्

**डॉ. गोविन्द नाथ चौधरी**

**प्रस्तावना**

ननु पाणिनीयव्याकरणे षड्विधं सूत्रं स्वीकृतमस्ति। तद्यथा–

'संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।'

एतेषु षड्विधेषु सूत्रेषु विधिसूत्रं शब्दानुशासनस्य प्रक्रियां पूरयति, तस्मात् कारणात्सूत्रमिदं मुख्यं मन्यते। शिष्टानि पंचविधानि सूत्राणि विधिसूत्रोपकारकाणि भवन्ति। अर्थात् शब्दानुशासने तु मुख्यरूपेण विधिसूत्रमेव प्रसिद्धम्, परञ्च विधिसूत्राणामर्थावबोधनाय तदतिरिक्तानि पंचविधानि सूत्राणि उपयुज्यन्ते। अपरत्र कथयितुं शक्यते यद्विधिसूत्रस्य अर्थोद्घाटनाय संज्ञादिपंचविधानां सूत्राणामुपयोगः क्रियते। परिस्थितावस्यां कोऽप्याचार्यः स्यात्, सः स्वकीयव्याकरणशास्त्रस्य प्रारम्भे विधिसूत्रापेक्षया तदतिरिक्तानि विधिसूत्रस्य सहायकसूत्राणि एवोपस्थापयितुमिष्यते। अस्याः एव स्वाभाविकप्रक्रियायाः अनुसरणं कुर्वन् आचार्यपाणिनिरपि संज्ञासूत्रेण स्वकीयं व्याकरणं प्रारभत। तत्र सर्वप्रथमं 'वृद्धिरादैच्' [1] इति सूत्रमुपस्थापितम्।

यद्धि संज्ञासूत्रं भवति, तस्मिन् न्यूनातिन्यूनं द्वे पदे भवत एव। तयोर्द्वयोः पदयोः एकं पदं संज्ञि अपरञ्च संज्ञापदं भवति। संज्ञा–संज्ञीति पदद्वयं विना कस्यापि संज्ञासूत्रस्य परिकल्पना न कर्तुं शक्यते। कोऽप्याचार्यः किमपि शास्त्रञ्च स्यात्, यदि संज्ञासूत्रस्य परिकल्पना कर्त्तव्या चेत्तर्हि अनिवार्यरूपेण संज्ञा– संज्ञीत्यनयोः द्वयोः पदयोः परिकल्पना नूनमेव करणीया भविष्यति। एषा हि स्वाभाविकी प्रक्रिया विद्यते। तेनैव भगवान् पाणिनिरपि अस्याः एव स्वाभाविकप्रक्रियायाः अनुसरणं स्वकीयव्याकरणशास्त्रेऽपि कृतवान्।

संज्ञासूत्रेषु आवश्यकयोः संज्ञासंज्ञीति पदद्वयोः क्रमस्यापि एकः स्वाभाविको नियमो भवति। तेन स्वाभाविकनियमानुसारेण प्रथमं संज्ञीतिपदस्य तदनन्तरञ्च संज्ञेति पदस्य प्रयोगो भवति। यतो हि न संज्ञिपदमुद्देश्यं भवति, संज्ञापदञ्च विधेयम्। अतः 'उद्देश्यमनुक्त्वा न हि विधेयमुदीरयेद्' इति सिद्धान्तानुसारेण प्रथमं संज्ञीति पदस्य ततो विधेयपदस्य प्रयोगः उचितः। सांसारिकव्यवहारेऽपि अस्यैव क्रमस्यानुभवः कर्तुं शक्यते। यथा– कस्यापि संज्ञिभूतपदार्थस्य प्रथमा सत्ता भवति, तदनन्तरञ्च तस्य संज्ञाकरणस्योपक्रमः क्रियते। प्रथमं तावद् बालकस्य (संज्ञिनः) अस्तित्वं भवति तत्पश्चात् तस्य नाम्नः (संज्ञायाः) अस्तित्वमिति। अनयैव स्वाभाविकरीत्या संज्ञासूत्रेऽपि प्रथमं संज्ञिपदस्यानन्तरञ्च संज्ञापदस्य स्थानं मान्यमवतिष्ठते। परञ्च भगवान् पाणिनिः 'वृद्धिरादैच्' इति सूत्रे स्वाभाविकरीत्या निर्धारित–क्रमस्यानुसरणमकृत्वा तद्विपरीतं क्रममुपस्थापितवान्। तत्र प्रथमं वृद्धिरिति संज्ञापदं ततश्च आदैजिति संज्ञिपदं स्थापितवान्। एवंहि महर्षिपाणिनिः 'वृद्धिरादैच्' इति सूत्रसंरचनायामुपर्युक्तासु तिसृषु स्वाभाविक– रीतिषु प्रथमद्वयोः रीत्योरनुसरणं कृतवान्। परञ्च तृतीयायाः स्वाभाविकरीत्याः अनुसरणं कथं न कृतवान् इति विचारणीयो वर्तते।

पाणिनीयपरम्परायां 'वृद्धिरादैच्' इति सूत्रसंरचनाविषये सर्वप्रथमं भाष्यकारेण भगवता पतंजलिना विचारः कृतः। तद्यथा– [2] 'एतदेकमाचार्यस्य मंगलार्थे मृष्यताम्। मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति, आयुष्मत्पुरुषाणि च। अध्येतारश्च वृद्धियुक्ता यथा स्युरि'ति। अर्थात् भगवतः पाणिनेराचार्यस्य आचारोऽयं मंगलार्थो वर्तते, इति ज्ञेयम्। मांगलिक आचार्यः महतः शास्त्रसमूहस्य मंगलाय वृद्धिशब्दमादौ प्रयुक्तवान्। यानि मंगलादिशास्त्राणि भवन्ति, तेषामेव विस्तारो भवति, तस्याध्येतारो वीरपुरुषाः, आयुष्मन्तश्च भवन्ति। (प्रस्तुते प्रसंगे वृद्धिशब्देन क्रियमाणे मंगलाचरणे) अस्य शास्त्रस्य अध्येतारः वृद्धया युक्ताः स्युः, एवंविधस्य मंगलस्य कामना कृता विद्यते। अर्थात् मंगलार्थं वृद्धिशब्दः प्रथमक्रमे स्थापितः। अत्रैव कैयटेनोक्तं यदत्र मंगलसिद्धयर्थम् (संज्ञा–संज्ञीति एवंविधस्य) अन्यथाक्रमः स्थापितः। स्वाभाविकरूपेण चार्थस्य (सूत्रार्थस्य) सिद्धये तु (संज्ञिसंज्ञेति एवंविधस्य) अन्यथा क्रमः स्वीक्रियते। तद्यथा– [3] 'इह तु मंगलार्थोऽन्यथा पाठक्रमः। आर्थस्त्वन्यथा क्रमः' इति। भाष्यकारस्य उपर्युक्तवचनस्यानुसरणमेव

अग्रिमायां सम्पूर्णव्याकरणपरम्परायां प्रायः अयमेवाभिप्रायः पुनरुक्तः कृतो दृश्यते। अर्थात् पाणिनीयव्याकरणपरम्परायाः सर्वे आचार्याः 'वृद्धिरादैच्' इति संज्ञासूत्रे पदक्रमपरिवर्तनस्य एकमात्रं कारणं मंगलार्थं स्वीकृतवन्तः।

भगवतः पाणिनेराचार्यस्य मनसि कीदृशी मंगलकामना आसीदिति उद्घाटयन् महर्षिः भगवान् पतंजलिः कथयति यत्– 'अध्येतारश्च वृद्धियुक्ता यथा स्युरिति'। अर्थात् शास्त्रस्यास्य अध्येतारः वृद्धियुक्ताः भवेयुरिति।

मानवानां मनसि जायमानासु अनेकासु कामनासु एका कामना वृद्धेरपि भवति। अतो भाष्यकारस्य वचनोपरि कस्याः अपि शंकायाः, कस्यापि प्रश्नस्य कारणं नोचितम्। परञ्च अस्याः वृद्धेः कामनायाः आचार्यपाणिनिपरिकल्पितं क्षेत्रं किमस्ति? किं पाणिनेराचार्यस्य मनसि– (1) शारीरिकी, मानसिकी आत्मिकी वा वृद्धिरपेक्षिता?, (2) धन–यशः–पद–प्रतिष्ठा–सुख–वैभवप्रभृतीनां वृद्धिरपेक्षिता?, (3) जन्म– मरण–चक्रान्मुक्तिरूपबुद्धौ वृद्धिरपेक्षिता?, एवंहि अन्याः अपि परिकल्पनाः मनसि समायान्ति। अत्र तात्पर्यं वर्तते यदासु विविधसम्भावितवृद्धिषु का वृद्धिः सूत्रकारैरभिप्रेता अस्तीति प्रश्नः विद्यते। अस्य प्रश्नस्य निश्चयात्मकम् उत्तरमन्वेषणीयमस्ति। अन्यथा मंगलरूपे अध्येतॄणां वृद्धिः स्यादिति भाष्यकारस्य कथनं मात्रमेकमौपचारिकं भविष्यति। पाणिनीयव्याकरण–परम्परायामस्य कुत्रापि स्पष्टरूपेणोत्तरं न दृश्यते। न ह्येतावदेव, इदानीं यावत् कुत्रापि न त्वेतादृशी जिज्ञासा जागृता कृता, न हि जिज्ञासां मनसि निधाय सम्भावितसमाधानरूपे किमपि कुत्रापि उक्तमित्यनुमीयते। समग्रपरम्परायामेतस्मिन् सन्दर्भे सर्वथा मूकं दृश्यते। सामान्यरूपेण यदि उपर्युक्तजिज्ञासायाः समाधानं कुर्मश्चेत्तर्हि कथयितुं शक्यते यदस्य शास्त्रस्य अध्ययनाध्यापकानां सार्वत्रिकी वृद्धिः स्यात्, एतादृशी मंगलकामना एनं वृद्धिपदमादौ उच्चार्य पाणिनिना व्यक्तीकृता।

एकत्र स्वाभाविकं समाधानं मनसि आयाति। आचार्यपाणिनिरष्टाध्याय्या रचयिता अस्ति। रचयितारं स्वकीयां रचनां प्रति रागः स्वाभाविक एव। शास्त्रकाररूपे शास्त्ररचयितुर्मनसि अस्य रागस्य किं स्वरूपं भवितुमर्हतीति कल्पना अतीव सरला विद्यते। स्वकीयं शास्त्रं दृष्टिसमक्षमुपस्थाप्य शास्त्रकारस्य मनः अध्ययनाध्यापनकर्तॄणां गुरुशिष्याणां स्वशास्त्रीयविषयपरिज्ञाने सततं वृद्धिर्भवेदिति भावनायाः अतिरिक्तमपरं चिन्तनं किं भवितुमर्हति। अनयैव मनोनिहितकामनया भगवान् पाणिनिः स्वशब्दानुशासनस्य प्रथमसूत्रे वृद्धिरिति पदस्य प्रथमप्रयोगः कृतवान्। यद्यपि समाधानमेतत् सन्तोषजनकमस्ति, तथापि आचार्यपाणिनिः यादृश्याः सुतीक्ष्णमेधायाः स्वामी आसीत्, सा मेधा केवलमौपचारिकी स्यादेवं न भवितुमर्हति। एतत्प्रकारकमंगलाचरणन्तु कोऽपि कर्तुं शक्नोति। पाणिनेर्मनसि अवश्यमेव किमपि विशिष्टं भवेत्। पाणिनेरस्मिन् व्यवहारे (वृद्धिशब्दस्यादौ स्थापने) यासां महत्त्वपूर्णानां सूचनानां संकेतः प्राप्तः, तासां विदुषां विचाराय सन्तोषाय च प्रस्तूयते–

पाणिनेराचार्यस्य सूचनानामनुभवः प्रत्येकमध्येतॄणां भवति। परञ्च 'वृद्धिरादैच्' इति सूत्रे पदक्रमपरिवर्तनेन आचार्यः स्वयमेव एतदाशयं कथयति–[4] 'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य' इति। अनेन वचनेन पाणिनेराचार्यस्य यां प्रखरमेधां प्रति इंगितं करोति, तत्प्रमाणस्वरूपेऽपि इमं क्रमपरिवर्तन– व्यवहारं समायोजनं कर्तुं शक्यते।

**'वृद्धिरादैच्' इति सूत्रे प्रयुक्तवृद्धिशब्दस्य निम्नानुसारेण पंच अर्थाः भवन्ति–**

1. मांगलिकपदत्वेन वृद्धिः– अर्थात् सार्वत्रिकं संवर्धनम्।
2. संज्ञाशब्दत्वेन वृद्धिः– अर्थात् व्याकरणस्यैका संज्ञा उत वा एकः पारिभाषिकः शब्दः।
3. प्रतीकशब्दत्वेन वृद्धिः– अर्थात् व्याकरणस्य सर्वासां संज्ञानां प्रतीकशब्दः (एतेन प्रतीकार्थकेनास्य पदस्य उच्चारणेन सहैव समासां संज्ञानां प्रतीतिर्भवति)।

   एषां त्रयाणामर्थानां स्वारस्यं भवति यद्– मांगलिकपदत्वेन यो वृद्धिशब्दः स सार्वत्रिकसंवर्धन–रूप–मंगलसूचक इति पतञ्जलिना मान्यः। अपरञ्च यत् संज्ञाशब्दत्वेन वृद्धिपदं, तत् संज्ञाशब्दस्य (किं वा पारिभाषिकशब्दस्य) स्वरूपे वर्तते। एनं संज्ञाशब्दं मनसि निधाय 'वृद्धिरादैच्' इति सूत्रस्यार्थः सम्पद्यते, एतच्च वृत्तिकारैः मन्यते। तृतीयश्च प्रतीकशब्दत्वेन यो वृद्धिशब्दः सः समासां संज्ञानां प्रतीकरूपेण विद्यते। एतेन प्रतीकार्थकेनास्य पदस्योच्चारणेन सहैव सर्वासां संज्ञानां प्रतीतिर्भवति। प्रतीतिरियं संकेतयति यद् यद्यपि व्याकरणे षड्विधानि सूत्राणि सन्ति, तथापि प्रथमं स्थानं संज्ञासूत्राणामेवेति। अर्थात् विध्यादि– सूत्राणाम् अर्थघटनोपक्रमे सर्वप्रथमं संज्ञासूत्राणामुपयोगो भवति। संज्ञासूत्राणामुपयोगं विना अन्येषां पञ्चविध–सूत्राणामर्थस्य परिज्ञानं न भवति। एवं हि तृतीयो वृद्धिशब्दः अष्टाध्याय्याः सर्वासां संज्ञानां सूचकोऽस्ति।
4. चतुर्थविधः वृद्धिशब्दः व्युत्पन्नशब्दत्वेनास्ति, तथा च– वर्धनमिति सा वृद्धिः। अर्थात् वर्धनक्रिया हि कस्यचिद् वस्तुनः सूचकाऽस्ति। पाणिनिना हि 'वृद्धिरादैच्' इति सूत्रे संज्ञासंज्ञीति पदयोः व्युत्क्रमं कृत्वा यद् वृद्धिपदं प्रथमे स्थाने स्थापितम्, तदष्टाध्यायीति ग्रन्थस्य वर्धितायाः पाठ्यसामग्र्याः सूचनां ददाति।

   सुविदितमस्ति यद् व्याकरणपरम्परायां प्रचलिताष्टाध्याय्याः पठनपाठनपद्धतौ सर्वप्रथमं सूत्रार्थस्य विचारः क्रियते। सूत्रार्थेऽस्मिन् विचारे (1) पदच्छेदः पदपरिचयश्च, (2) सूत्रस्थप्रयुक्तपदे विहितसमासपरिचयः, (3) अनुवृत्तेः परिज्ञानं कुर्वन्, अन्ते च (4) सूत्रार्थं यावद् गमनं भवति। एवमेव वारमेकं सूत्रार्थस्य परिज्ञाने जाते सति, द्वितीयसोपानरूपे तत्तत् सूत्रैः कस्मिन् पदे (उदाहरणे लक्ष्ये वा) केन प्रकारेण सूत्रमिदं कार्यं करोति, एतदपि ज्ञातव्यं भवति। एतदर्थम् (5) उदाहरणस्यापि विचारः क्रियते। व्याकरणशास्त्रे एषामुदाहरणानामपि द्विविधं रूपं भवति। तत्रैकस्मिन् रूपे तु मात्रममुकसूत्रेण कस्यां परिस्थितौ किं कार्यं सम्पाद्यते इत्येव विचारो भवति। अपरत्र समग्ररूपसिद्धिप्रक्रियायाः विचारो भवति। सारतस्तु अष्टाध्याय्याः पठनपाठनपद्धतौ पंच सोपानानि सन्ति, तानि सोपानानि सूत्रेणैतेन ज्ञापितेन भवन्ति, सूत्रं ज्ञायते। परञ्च केवलं सूत्रार्थज्ञानेनैव कार्यं न भविष्यति, अपितु एतदतिरिक्तमपि ज्ञातव्यमावश्यकं भवति, तदस्ति रूपसिद्धिप्रक्रिया। रूपसिद्धिप्रक्रियां विना व्याकरणाध्ययनकार्यं न्यूनमेव भवति।

   सामान्यतः संस्कृतसाहित्यस्य रघुवंशादिपाठकः शिष्यसम्प्रदायः रघुवंशादिगतपद्यानामर्थानां ग्रहणं कृत्वा स्वकीयं पठनं समापयति, तद्वदेव व्याकरणशास्त्रपाठकः शिष्यसमुदायः सूत्रार्थानां ग्रहणं कृत्वा स्वकीयं पठनं न समापयति। अपितु तस्मै कृते तु प्रथमं सूत्रार्थग्रहणं तदनन्तरं रूपसिद्धिप्रक्रिया पठनीया भवति। न ह्येतावदेव अस्याः रूपसिद्धिप्रक्रियायाः पठनसमये समग्रं व्याकरणं सहैव स्मृतिपथमारोहति। नैतत्करणे रूपसिद्धिप्रक्रियायाः सम्पादनं सम्भवं भवति। एवंविधेन विचारणेन स्पष्टं भवति यदन्येषां पाठ्यग्रन्थानां पठनापेक्षया व्याकरणस्य पाठ्यवस्तु वृद्धं, विस्तीर्णं व्यापकं चास्ति। भगवान् पाणिनिर्हि अस्यैव पाठ्यवस्तुनः सूचना वृद्धिपदमादौ स्थापयित्वा ददाति। एवञ्च वृद्धिपदं प्रथमक्रमे

स्थापनस्यैकं स्वारस्यं व्याकरणस्य पाठ्यवस्तु वृद्धमस्ति, अस्याः अपि सूचना दातव्या अस्ति।

5. व्युत्पन्नशब्दत्वेन वृद्धिः (वर्धते अनया सा वृद्धिः)– अर्थात् वर्धनस्य साधनम्। एवंविधं वृद्धिशब्दमादौ प्रयुज्य पाणिनिः सूचयति यत्– (अन्य पाठ्यग्रन्थानामपेक्षया अस्य अष्टाध्यायीरूपिपाठ्यवस्तुनः वृद्धविषयवस्तु) अर्थात् रूपसिद्धिप्रक्रियायामग्रेसराय वृद्धिः अर्थात् संज्ञा (संज्ञाकरणम्) मार्गदर्शिका पाठकानां कल्याणप्रदा च भविष्यति। व्याकरणशास्त्रे पाठकाय रूपसिद्धिप्रक्रियायाम् अमुकसूत्रानन्तरं किं सूत्रं प्रवर्तते, एतज्ज्ञाने काठिन्यं भवति। एतस्मात् काठिन्यात् मुक्तये स्वयमेव भगवान् पाणिनिः वृद्धिशब्दमादौ प्रयुज्य मार्गदर्शनं कृतवान् यद्रूपसिद्धिप्रक्रियायाः आरम्भः संज्ञासूत्रेण भवति, पश्चाच्च अग्रिमायां प्रक्रियायामपि संज्ञासूत्रमेव मार्गदर्शकं भूत्वावतिष्ठते। एतद्धि परम्परायां 'या या संज्ञा सा सा फलवती' [5] इति न्यायेन प्रचलनं कृतम्, परञ्चास्य मूलसंकेतः पाणिनेः कस्मिन् वचनेऽस्ति, एतत्समाधानं न दृश्यते। अस्माकं मते अस्मिन् वृद्धिशब्दे एष विचारः समायातः यद्रूपसिद्धिप्रक्रियायामग्रेसराय मार्गदर्शकसाधनरूपे संज्ञाकरणमस्ति, एतत्परिज्ञानार्थं भगवता पाणिनिना वृद्धिशब्दस्य पूर्वप्रयोगः कृतः।

एवंविधविचारणेन ज्ञायते यद् व्याकरणेन सम्पद्यमानायां कस्यामपि रूपसिद्धिप्रक्रियायां सर्वप्रथमं संज्ञाकरणकार्यमेव क्रियते। यथा– सुबन्तपदानां रूपसिद्धिप्रक्रियायाः प्रारम्भः प्रातिपदिकसंज्ञया तथा तिङन्तपदानां रूपसिद्धिप्रक्रियायाः आरम्भः धातुसंज्ञया भवति। क्वचित् 'सर्वविधिभ्यो लोपविधिर्बलीयान्' [6] इति परिभाषया केषांचित् पदानां रूपसिद्धिप्रक्रियायाः आरम्भः इत्संज्ञया भवति। परमेतत्तु नूनमेवास्ति यत् कस्याः अपि रूपसिद्धिप्रक्रियायाः आरम्भः संज्ञाकरणेनैव भवति। एषः संकेतोऽपि वृद्धिशब्दस्य पूर्वप्रयोगेण पाणिनिना प्रदत्तः। एतच्च एवंविधमपि ज्ञातव्यं भवति यद् यदि 'भवति' इति पदस्य रूपसिद्धिप्रक्रिया कर्त्तव्या चेत्तर्हि सर्वप्रथममस्याः रूपसिद्धिप्रक्रियायाः प्रारम्भः कथं कर्तुं शक्यते इति प्रश्ने सति उत्तरमस्ति– धातुसंज्ञा। धातुसंज्ञा हि भवतीत्यस्य रूपसिद्धिप्रक्रियां प्रारभते। प्रारब्धे सति अग्रिमप्रक्रियायै यदा कापि दिशा न प्राप्येत तदा कामपि संज्ञां स्मरेत्। एवं प्रारब्धा प्रत्येकरूपसिद्धिप्रक्रिया कथमग्रेसरा क्रियते? कथं ज्ञातव्यं भवेदग्रे का प्रक्रिया कर्त्तव्या? इत्यादीनां समेषां प्रश्नानामुत्तरस्य संकेतः पाणिनिना एतेन वृद्धिशब्देन प्रदत्तः। संक्षेपतः कथयितुं शक्यते यद् रूपसिद्धिप्रक्रियायामग्रगमनरूपवृद्ध्यर्थम् उपयोगिसाधनं व्याकरणस्य समस्ताः संज्ञाः सन्ति।

एवंहि 'वृद्धिरादैजि'ति सूत्रे वृद्धिपदक्रमस्य स्वारस्यं न केवलं मंगलाचरणम्, अपितु तदतिरिक्त (क) षड्विधसूत्रेषु संज्ञासूत्रस्य आद्यस्थानीयत्वम्, (ख) सूत्रार्थपरिज्ञाने संज्ञायाः आवश्यकता, (ग) व्याकरणपाठ्यवस्तुनः वर्धनं तथा च (घ) वर्धितायां पाठ्यवस्तुरूप–रूपसिद्धिप्रक्रियायामग्रगमनाय (अर्थात् वृद्धिप्राप्तये) संज्ञायाः उपयोगिता इत्यादीनां संकेताय भगवता पाणिनिना 'वृद्धिरादैच्' इति सूत्रे वृद्धिपदस्य पूर्वप्रयोगः कृतः।

ननु 'वृद्धिरादैच्' इति सूत्रस्थम् आदैजित्यत्र आत् तथा ऐजिति पदद्वयं विद्यते। अत्र आत् इत्यत्र 'तपरस्तत्कालस्य' [7] इत्यनेन तपरकरणं कृतं दृश्यते। एतच्च तपरकरणमाकारार्थं नैवावश्यकम्, यतः आकारेण सवर्णग्रहणं नैव भवति। परञ्च ऐजित्यस्य कृते तपरकरणस्यास्य प्रयोजनमस्ति। सामान्यरूपेण ऐजिति प्रत्याहारेण सवर्णग्रहणं भवति, परञ्च तदत्र नेष्यते। अतएवात्र तपरग्रहणं कृत्वा तत्कालस्य विधानं कृतमस्ति येन प्लुतसंज्ञकयोः ऐकारौकारयोः वृद्धिसंज्ञा न भवति।

वस्तुतः सूत्रेऽस्मिन् पदान्ते विद्यमानस्य चकारस्य 'चोः कुः' [8] इत्यनेन कुत्वे कृते गकारो भवितुमर्हति। परञ्च 'छन्दोवत्सूत्राणि भवन्ति' [9] इति वचनानुसारेण सूत्रमेतच्छन्दोवचनं मत्वा 'अयस्मयादीनि छन्दसि' [10] इत्यत्र निर्दिष्टे अयस्मयादिगणे ऐजिति पदस्य समावेशं कृत्वा अस्य भसंज्ञा क्रियते, येन एकसंज्ञाधिकारमनुसृत्य पदसंज्ञा निषिध्यते, येन चानिष्टं कुत्वमपि निवार्यते।

एतेन सूत्रेण समेषाम् (तद्भावितानामतद्भावितानाम्) आकारैकारौकाराणां वृद्धिरितिसंज्ञा भवति, न केवलं तेषामेव ये वृद्धिकार्येण जायन्ते। यथा– माला इति शब्दे विद्यमानः मकारोत्तरः आकारः यद्यपि वृद्धिकार्येण निर्मितो नास्ति तथापि तस्य अनेन सूत्रेण वृद्धिसंज्ञा भवति। यदीयं वृद्धिसंज्ञा नाभविष्यत् तर्हि 'मालायां भवः' इत्यर्थे 'वृद्धाच्छः' [11] इति सूत्रेण छप्रत्ययो नैव अप्राप्स्यत येन मालीयः इति रूपं न असेत्स्यत्।

## संदर्भ


1. अष्टाध्यायी– 1/1/1
2. महाभाष्यम्– पस्पशाह्निकम्
3. महाभाष्यम् (प्रदीपः)– पस्पशाह्निकम्
4. काशिका– 'उदक् च विपाशः' इति सूत्रे
5. वैयाकरणसिद्धान्तकौमुदी– भूमिका
6. परिभाषेन्दुशेखरः– 99
7. अष्टाध्यायी– 1/1/70
8. अष्टाध्यायी– 8/2/30
9. महाभाष्यम्– 'वृद्धिरादैच्' इति सूत्रे
10. अष्टाध्यायी– 1/4/20
11. अष्टाध्यायी– 4/2/114